International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(6): 15-16
© 2016 IJSR
www.anantaajournal.com
Received: 05-09-2016
Accepted: 06-10-2016

**Krishna Arya**
Assistant Prof. Department, Sanskrit B. P. S. M. V. Khanpur. R. C. kharl, Jind, Haryana, India

**Correspondence**
**Krishna Arya**
Assistant Prof. Department, Sanskrit B. P. S. M. V. Khanpur. R. C. kharl, Jind, Haryana, India

# नैषधमहाकाव्ये आश्रम–व्यवस्थायाः निरूपणम्

## Krishna Arya

अपरिमिते गगनमण्डले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते। तानि सर्वाण्येव समष्ट्या ज्योतिः शब्देनोच्यन्ते तेष्वपि यानि हि सदैकरूपाणि तानि नक्षत्रशब्देन ज्ञायन्ते, प्रतिदिनं भिन्न–भिन्न गतिना तु ग्रहशब्दः। एतेषु ग्रहनक्षत्रेष्वपि केचिदमृतमयकिरणाः, केचिद् विषमयकिरणाः केचिदुभयकिरणाः केचित्तूभयधर्महीनः रश्मयश्च स्मृताः।

ग्रहाः सूर्यं (भुवं वा) परितो भ्रमन्ति, उपग्रहास्तु ग्रहं परितः। अस्माकं चन्द्रस्तु भुवं परितो भ्रमतीति भूर्ग्रहः, चन्द्र उपग्रहः। भूश्चतुर्विंशत्या होरा– (घण्टा)–भिः स्वाक्षं परितो भ्रमन्ती, एकेनसौरवर्षेण (३६५ दिन, ५ घण्टे ४६ मिनट ५१.६ सैकण्ड) सूर्यं परिक्रामति भुवः स्वक्षोपरि भ्रमणं पूर्वतः पश्चिमायां गच्छन्त इव प्रतीयन्ते। एवं भुवः पश्चिमभ्रमणहेतुक ग्रहनक्षत्राणामुदयास्ताः। अश्विन्यादिनक्षत्रसंचारस्तु भुवः पूर्वगमनहेतुक इति पाश्चात्यानां सिद्धान्तः। एवमिहोपर्युपरि ग्रहकक्षाक्रमः पाश्चात्यगोलगणितनिबन्धेषु सप्रपञ्चं प्रकटीकृतः–

> बुधः शुक्रो महीभौमो गुरूः शनिरथापरे।
> भ्रमन्ति परितः सूर्यं, सूर्यो ब्रह्माण्डमध्यज्ञः।।

भारतीयाः सप्त किं वा नवग्रहसंख्यैव विचारचर्वणायै पर्याप्ता। द्वादशमासानां नक्षत्रसंयोगानुसारं चित्रया सहिता पौर्णमासी चैत्री, सा यत्रान्वेत्सौ चैत्रः 'नक्षेत्रेण युक्तः कालः ४/२/३ इति पाणिनिसूत्रेण समर्थितानि साम्प्रतं चैत्र–वैशाखादीनि नामानि रूढ़िमुपगतानि।

ज्योतिषस्कन्धे ग्रहाणां तत्तत्कालिकासंस्थावशेन सुभिक्षदुर्भिक्षादि सार्वभौमफलसूचिका विविधाकाराः प्राकृतिकघटना सहकृताः फलव्यपदेश्याः प्रभावोत्पादिकाः स्थितयः साकल्येन निर्दिष्टाः।

आचार्यवराहमिहिरकृतबृहज्जातके ग्रहपिण्डानां पञ्चभूतात्मकत्वेऽपि प्राधान्येन प्रकृत्यंशादिविषयकं विवेचनमेकैकशः कृतमिति ज्ञेयम्। तद्यथा– पुरूषग्रहाः–रविभौम गुरवः। स्त्रीग्रहौ–चन्द्रशुक्रौ नपुसकौ च शनिबुधौ। सूर्यो रक्तश्यामवर्णः, चन्द्रो गौरः, भौमो रक्तगौरः, बुधो – दूर्वावर्णः, गुरूः पीतः, शनि श्यामश्च। रविः स्थिरः चन्द्रश्चञ्चलः, भोमः उग्रः, बुधोमिश्रः, गुरूः क्षिप्रः शुक्रो मृदुश्च, शनिर्दारूणस्वभावश्च।

रविचन्द्रगुरवः सत्त्वप्रधानाः, बुधशुक्रौ रजोगुणप्रधानौ, भौमशनिश्च तमात्मकौ। रविभौमयोरग्नितत्त्वम्, चन्द्रशुक्रयोः जलतत्त्वम्, बुधस्य भूमितत्त्वम्, गुरोः आकाशतत्त्वम्, शनेर्वायुतत्त्वम्, इत्थं गुणभाजो ग्रहाः मेषादिद्वादशराशिषु क्रमेण तत्तत्प्रदेशवञ्छिन्नस्य रविवर्त्मनो महाकाशप्रदेशस्य स्वामिनः। यथा–रविः–सिंहस्य, चन्द्रः कर्कस्य, भौमः वेषवृश्चिकयोः, बुध–कन्यामिथुनयोः, गुरूः –धनुमीनयोः, शनि–मकरकुम्भयोश्च ज्ञेयः।

राशितत्त्वानि यथा– मेष–सिंह–धनूंषि–अग्निराशयः। वृष–कन्या–मकराः–भूमिराशयः। मिथुनतुलाकुम्भाः–वायुराशयः। कर्क–वृश्चिक–मीनाः–जलचरराशयश्चेति। एवं तत्तत्प्रकृत्यंशसंश्लिष्टा राशयो हि कालपुरूषः पदवाच्यस्य विराट्पुरूषस्याङ्गसम्बन्धिनः प्रकल्पिताः। ज्यौतिषिकः कालपुरूषः एवायुर्वेदीय प्राक्सुश्रुतोपदिष्टः कर्मपुरूषः देहधारी मनजो विवक्षितः। अनयोः प्राकृतिकी स्थितिर्बृहल्लघुमान तारतम्येनानुपात सम्बन्धिनीति न कोऽपि भेदो दृश्यते बृहज्जातकोक्ते राशिस्थितिर्यथा –

मेषः शिरः। वृषो मुखम्। मिथुनोवृक्षस्थलम्। कर्को हृदयम्। सिंह उदरम्। कन्याकटिः। तुला वस्तिः। वृश्चिकोलिङ्गम्। धनु ऊरूद्वयम्। मकरो जानुद्वयम्। कुम्भः जङ्घा द्वयम्। मीनः चरणद्वयम् इति कालपुरूषदेहे स्थिरचक्रन्यासः। एवं षड्वर्गोऽपि कालपुरूषस्य मूलाधारादयः षडाधाराः क्रमेण सूत्रिता वेदाङ्गत्वेन व्याख्याता – द्वेष्काणः पादौ, होरा मुखम्, नवांशाः–पाणियुगलम्, त्रिशांशकाचक्षुषी। द्वादशांशो नासापुटम्, क्षेत्रंश्रवणयुगलम्, अत्रांश वशेन विभक्तेषुषड्वर्गेषु नवांशका नवप्राणात्मका इत्यस्य प्राधान्यम्।[1] धनञ्जया व्यरिरिक्ता नवप्राणाः नवांशकाः। द्वादशांशकास्तु मनोबुद्धि–इन्द्रियदशकात्मकाः नवभिः प्राणैर्द्वादशभिरिन्द्रियैरपि एकविंशतिविधं सूक्ष्मशरीरमुत्पद्यते। कालपुरूषस्य सूर्य आत्मा। चन्द्रा

मनोऽन्तःकरणम्। भौमः सत्त्वं वीर्यमिति यावत्। बुधो वागिन्द्रिय्। गुरूर्ज्ञानम्। शुक्रोऽपि कायत्मकः किन्तु शनिर्दुःखम्। आत्मादिभूतेषु ग्रहेषु बलवत्सु जातस्यात्मप्रभावो जायते, मनोभूतस्य चन्द्रस्य बलवते मनः प्रभवो जायते, आत्ममनसोरेवरेतराश्रयत्वात् सूर्यचन्द्रमसोरेकस्य बलवशादितरस्य बलिबुद्धिः।
पुरूषस्य मनः प्राधान्येन सर्वप्रवृत्तिर्दृश्यते। तस्माच्चन्द्रबलक्षयेऽन्यग्रहा मनफलका इव जायन्ते। स्थूल शरीरं तु त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रमयं तद्राशिसञ्ज्ञम्। सप्तधातूनां शरीरसम्बन्धेनाधिपत्यमुच्यते शनिः स्नायुसारः स्नायुना ग्रथित शिरासंघात उच्यते। अर्कोऽस्थिसारः चन्द्रोरूधिरसारः रूधिर शब्देन मांसमप्याक्षिष्यते रूधिरस्य जीवनावस्थायामेव सद्भावात्। बुधस्त्वक्सारः त्वक्शब्देनरसधातरेवोच्यते। धात्वग्निना पचमानाद्रसधातोरसृग्स्रावे त्वचः सम्भवात्। शुक्रः शुक्रसारः गुरूर्वसासारः मेदसारः इति वा। भौजो मज्जासारः मज्जा नाम अस्थिनामन्तर्वर्तमानस्तदवष्म्भकरो धातुः। जन्मनियो ग्रहो वलवान् वदुक्तधातुसारश्च भवति। अन्यथा तेषु रोगदिना पीडा च अत्रेदमपि विचिन्त्यम्– सूर्यः पित्तप्रकृतिः, चन्द्रो वातश्लेषमिश्रप्रकृतिः, भौमः पैतिकः बुधः पित्तमारूतः कफप्रकृतिः भूम्यात्मकत्वात् भूमेश्च शब्दस्पर्शरूपरसगन्धगुणात्मकत्वात् सन्निपातप्रकृतिरत एव योगवाही च भवति। गुरूः श्लेष्मात्मकः, शुक्रः – कफनिलात्मा, शनिश्च वातप्रकृतिः रव्यादयः शन्यन्ताः कटुकलवणतिक्तमिश्र–मधुराम्लकषायाख्याषट्रसाधिपाः सन्तीति। एते तत्तत्प्राकृतिकसम्बन्धबद्धा ग्रहपिण्डाराशिचक्राधिकृताः मणयः इवैकत्राकर्षणप्रभावमहिम्ना व्यस्ताऽपि समस्ता इव तन्वादिद्वादशभाव विभक्तस्वस्वाधिकारानुरूपं शासक इव स्वायत्त वर्गेषु निग्रहानुग्रहगुणधर्मशीलाः प्रभाववशवर्तिविकारान प्रकटयन्ति। तदेतत्कालाश्रितमेव शास्त्रेषूच्यते। यथा हि बृहस्पतिः–

स्वभावादेव कालोऽयंशस्त्राशुभसमन्वितः।
अनादि निधनः सर्वो न निर्दोषो न निर्गुणः।।[2]

**आचार्यवराहमिहिरोऽपि–**
कर्मार्जितं पूर्वभवे सहादियत्तस्य पंक्ति समभिव्यनक्ति।।[3]

**संन्दर्भः–**


1. संस्कृतरत्नाकरः पृष्ठ संख्या – १७७
2. उद्धृतम् संस्कृतरत्नाकर :– २००
3. बृहज्जातकम्।